
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M-2505 विषय ________

नांव उदकशांती

लेखक/लिपीकार ________

पृष्ठ 43

काळ ________ पूर्ण/अपूर्ण पूर्ण

 ४३ प०

॥ उदकशांतप्रारंभः ॥

उ॰ शां॰ श्रीगणेशाय नमः॥ हरिः ॐ ओम्॥ उदकशांतिं व्याख्यास्यामो गोमयेन गो
१ चर्ममात्रं चतुरस्रमुपलिप्य कर्ता शुचिः स्नातः प्रक्षालितपाणिपाद आचांतो
दर्भेषूपविश्य दूर्वाः दर्भान्धारयमाणः प्राणानायम्य देशकालौ संकीर्त्यामु
ककर्मांगभूतामुदकशांतिं करिष्ये इति संकल्प्य पंचप्रस्थसिकताभिः शु
द्धाभिररत्निररत्निमात्रं चतुरस्रं स्थंडिलं कृत्वा स्रुवर्णेनोद्धृत्य दर्भानंगुष्ठेन
महानाम्न्या चोपसंगृह्य ब्रह्मजज्ञानं प्रथमं पुरस्तात्॥ विसीमतः सुरुचो
वेन आवः॥ स बुध्न्या उपमा अस्य विष्ठाः॥ सतश्च योनिमसतश्च विवः॥ राम
इति तस्य पश्चादारभ्य मध्ये प्राचीं संततां रेखां लिखित्वा नाकेसुपर्णमुप १

स्य
यत्पतंतं तꣳहृदावेनंतोअभ्यचक्षत त्वा॥हिरण्यपक्षंवरुणदूतंयमस्ययोनौश
कुनंभुरण्युं॥इतितस्यदक्षिणतःप्रादेशमात्रेतथैवंविलिख्यतस्योत्तरतः
आप्यायस्वसमेतुतेविश्वतःसोमवृष्णियं॥भवावाजस्यसंगथे॥इतितथै
वंलिंविख्यतस्यदक्षिणतोमध्याद्वारभ्ययोरुद्रोअग्नौयोअप्सुयओषधी
षुयोरुद्रोविश्वाभुवनाविवेशतस्मैरुद्रायनमोअस्तु॥इतिउदीचीꣳसंत
तांरेखांलिखित्वातस्याःपश्चात्प्रादेशमात्रइदंविष्णुर्विचक्रमेत्रेधानि
ꣳ दधेपदंसमूढमस्यपांसुरे॥इतितथैवंविलिख्यतस्याःपुरस्तादिंद्रंवि
श्वाअवीवृधन्समुद्रव्यचसंगिरः॥रथीतमꣳरथीनांवाजानाꣳसत्त

उ.द तिंपतिं॥इतितथैवंविलिख्याद्भिरभ्युक्ष्यदूर्वादर्भैरवकीर्यगंधोदकेना
२ भ्युक्ष्यपुष्पैःफलैरवकीर्यतदुत्तरतोदर्भेषुप्रोक्षणीःसंपूर्णंकृत्वातत्रत्सपात्रंप्रो
क्ष्यधूपयित्वाब्रह्मजज्ञानमितिमंत्रेणस्थंडिलेनिधायदेवस्यत्वास
वितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांपरिस्तृणामीतिशोडशा
भिर्दर्भैरुदगग्रैःपुरस्तात्परिस्तीर्यभूर्भुवःस्वरितिदक्षिणतःप्राग
ग्रैःसप्तदशाभिरुद्वयंतमसस्परिपश्यंतोज्योतिरुत्तरं॥देवंदेवत्रासूर्य राम
मगन्मज्योतिरुत्तमं॥इतिपश्चादुदगग्रैरष्टादशाभिरग्नआयाहि २

वीतये गृणानो हव्यदातये॥ निहोता सत्सि बर्हिषि॥ इत्युत्तरतः प्रागग्रैस
स्तदशाभिः परिस्तीर्य तत्सवितुर्वरेण्यं भर्गोमितिजपंस्त्रिः पवित्रं ब्रह्म
पात्रेप आनीय भूर्भुवः स्वरोमितियवाक्षततंडुलानोप्यदूर्वाभिः फले
रवकीर्य दूर्वादर्भैः प्रछाद्य सुप्रक्षालितपाणिपावाचांतांश्चतुरो ब्राह्मणा।
नुदकू शांतिमृत्विजं त्वामहं वृण इति वृत्वा प्रतिदिशमासनेषूपविश्य
शन्नोदेवीरभिष्टय आपो भवंतु पीतये॥ शंयोरभिस्रवंतु नः॥ इत्यभिमृ
शति ब्रह्मपात्रमन्वारभ्य तत्सवितुर्वरेण्यमिति एवं व्याहृतिपूर्वां पच्छो
र्धर्चशो नवानमित्युक्त्वा वेदादीन्वाक्षोघ्नादींश्च जपेयुः॥ हरिः ऽ ओम्

ऊ॰ शां॰ ॥ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं ॥ होतारं रत्नधातमं ॥ इषे त्वोर्जे
॥ २ ॥ त्वा वायव स्थो पायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥ अ
ग्न आयाहि वीतये गृणानो हव्यदातये ॥ नि होता सत्सि बर्हिषि ॥ शन्नो देवी
रभिष्टय आपो भवंतु पीतये ॥ शंयोरभिस्रवंतु नः ॥ ओम् ॥ कृणुष्व पाजः
प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन ॥ तृष्वीमनु प्रसितिं द्रूणानोस्तासि
विध्य रक्षसस्तपिष्ठैः ॥ तव भ्रमास आशुया पतंत्यनु स्पृश धृषता शोशुचा
नः ॥ तपूंष्यग्ने जुह्वा पतंगानसंदितो विसृज विष्वगुल्काः ॥ प्रतिस्पशो राम्
विसृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ॥ यो नो दूरे अघशंसो ॥ २ ॥

यो अंत्यग्ने माकिष्टे व्यथिरा दधर्षीत् ॥ उदग्ने तिष्ठ प्रत्या तनुष्व न्यमित्रां
ओषतात्तिग्महेते ॥ यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न
शुष्कं ॥ ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ॥ अवस्थिरा
हि तनुं यातुजूनां जामिमजामिं प्रमृणीहि शत्रून् ॥ स ते जानाति सुमतिं य
विष्ठ य ईवते ब्रह्मणे गातुमैरत् ॥ विश्वान्यस्मै सुदिनानि रायो द्युम्नान्य
र्यो वि दुरो अभि द्यौत् ॥ सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा
य उक्थैः ॥ प्रीपिषति स्व आयुषि दुरोणे यस्त्वा नित्येन हविषा य उक्थैः ॥

॥उ॰ शां॰ विश्वेदस्मै सुदिनासासदिष्टिः॥ अर्चामि ते सुमतिं घोष्यर्वाक् सं ते वावाता
॥४॥ जरतामियं गीः॥ स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून्॥
इह त्वा भूर्या चरेदुप त्मन्दोषावस्तर्दीदिवांसमनु द्यून्॥ क्रीडंतस्त्वा सुमन
सः सपेमाभि द्युम्ना तस्थिवांसो जनानां॥ यस्त्वा स्वश्वः सुहिरण्यो अ
ग्न उपयाति वसुमता रथेन॥ तस्य त्राता भवसि तस्य सखा यस्त आति
थ्यमानुषग्जुजोषत्॥ महो रुजामि बंधुता वचोभिस्तन्मा पितुर्गोत
मादन्वियाय॥ त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमू राम्
नाः॥ अस्वप्नजस्तरणयः सुशेवा अतंद्रासोवृका अश्रमिष्ठाः॥ ते ॥४॥

पायवः सध्रियंचो निषद्या भ्नेतवनः पाखमूर ॥ येपायवोमा्मतेयंतेअग्ने
पश्यंतो अंधंदुरितात्ररक्षन् ॥ ररक्षतान्सुकृतो विश्ववेदा दिप्संतइद्वि
द्रिपवो नाहदेभुः ॥ त्वयावयं सधस्त्वो तास्तवप्रणीत्यश्याम वाजान् न्य
॥ उभाशंसासूदयसत्यतातेनुष्टुया कृणुह्यद्वयाव्य ॥ अयातेअग्नेस
मिधाविधेमप्रतिस्तोमं शस्यमानंगृभाय ॥ दहाशसोरक्षसः पाह्य
स्मान्द्रुहोनिदोमित्रमहोअवद्यात् ॥ रक्षोहणंवाजिनमाजिघर्मिमि
त्रंप्रथिष्ठमुपयामिशर्म ॥ शिशानोअग्निःक्रतुभिःसमिद्धःसनो
दिवासरिषःपातुनक्तं ॥ विज्योतिषाबृहताभात्यग्निराविर्विश्वानिकृ र्वि

उ॰ रां णुतेमहित्वा॥ आदेवीर्मायाःसहतेदुरेवाःशिशीतेशृंगेरक्षसेरक्षसेवि
५॥ निक्षे॥ उतस्वानासोदिविषंत्वग्नेतिग्मायुधारक्षसेहंतवाउ॥ यत्रप्र
तिसरबंधः॥ मदेचिदस्यप्ररुजंतिभामानवरंतेपरिबाधोअदेवीः॥
उरुंकर्तव्यं॥ इंद्रंवोविश्वतस्परिहवामहेजनेभ्यः॥ अस्माकमस्तु
केवलः॥ इंद्रंनरोनेमधिताहवंतेयत्पार्यायुनजतेधियस्ताः॥ शूरो
नृषाताशवसश्चकानआगोमतिव्रजेभजात्वंनः॥ इंद्रिया[illegible]श
तक्रतोयातेजनेषुपंचसु॥ इंद्रतानितआवृणे॥ अनुतेदायि राम्
महइंद्रियायसत्रातेविश्वमनुवृत्रहत्ये॥ अनुक्षत्रमनुसहो॥ ५॥

यजत्रेंद्र देवेभिरनुतेनृषह्ये॥ आयस्मिंत्सप्तवासवास्तिष्ठंति स्वारुहोय
था॥ ऋषिर्हदीर्घश्रुत्तम इंद्रस्यघर्मो अतिथिः॥ आमासूपक्वमैरय
आसूर्यं रोहयो दिवि॥ घर्मंनसामंतपसुनोवृक्तिभिर्जुष्टंगिर्वणसे
गिरः॥ इंद्रमिद्गाथिनोबृहदिंद्रमर्केभिरर्किणः॥ इंद्रंवाणीरनूषत
॥ गायंतित्वागायत्रिणोर्चंत्यर्कमर्किणः॥ ब्रह्माणस्त्वाशतक्रतवु
द्वंशमिवयेमिरे॥ अंहोमुचेप्रभरेमामनीषामोषिष्ठदाव्नेसु
मतिंगृणानाः॥ इदमिंद्रप्रतिहव्यंगृभायसत्याःसंतुयजमानस्यका
माः॥ विवेषयन्माधिषणाजजाननस्तवैपुरापार्यादिंद्रमन्हः॥ अंहसो ह

॥उ॰ शं॥ यत्रपीपरद्यथानोनावेवयांतमुभयेहवंते॥प्रसम्राजंप्रथममध्वराणा

॥६॥ मंहोमुचंवृषभंयज्ञियानां॥अपांनपातमश्विनाहयंतमस्मिन्नरइंद्रि

जः यंधत्तमो॥विनइंद्रमृधोजहिनीचायच्छपृतन्यतः॥अधस्पदंतमीं

कृधियोअस्माँअभिदासति॥इंद्रक्षत्रमभिवाममोजोजायथावृष

भचर्षणीनां॥अपानुदोजनममित्रयंतमुरुंदेवेभ्योअकृणोरुलोकं

॥मृगोनभीमःकुचरोगिरिष्ठाःपरावतआजगामापरस्याः॥सृकं

संशायपविमिंद्रतिग्मंविशत्रूंताढिविमृधोनुदस्व॥विशत्रून्वि ॥राम॥

मृधोनुदविवृत्रस्यहनूरुज॥विमन्युमिंद्रभामितोमित्रस्याभिदा॥ ६॥

स्तः॥ त्रातारमिंद्रमवितारमिंद्रंहवेहवेसुहवंशूरमिंद्रं॥ ह्वयामिशक्रं
पुरुहूतमिंद्रंस्वस्तिनोमघवाधात्विंद्रः॥ मातेअस्यांसहसावन्परिष्टा
वघायभूमहरिवः परादै॥ त्रायस्वनोवृकेभिर्वरूथैस्तवप्रियासः सूरि
षुस्याम॥ अनवस्तेरथमश्वायतक्षंत्वष्टावज्रंपुरुहूतद्युमंतं॥ ब्र
ह्माणइंद्रंमहयंतोअर्कैरवर्धयन्नहयेहंतवाउ॥ वृष्णेयत्तेवृषणोअर्क णो
मर्चानिंद्रग्रावाणोअदितिः सजोषाः॥ अनश्वासोयेपवयोरथाइं
द्रेषिताअभ्यवर्तंतदस्यून्॥ यतइंद्रभयामहेततोनोअभयंकृधि॥
मघवञ्छग्धितवतन्नऊतयेविद्विषोविमृधोजहि॥ स्वस्तिदाविशस्पति

दि

उ॰ शां वृत्रहा मृधो वशी ॥ वृषेंद्रः पुर एतु नः स्वस्तिदा अभयंकरः ॥ महाँ इंद्रो वज्र
॥ ७ ॥ बाहुः षोडशी शर्म यच्छतु ॥ स्वस्ति नो मघवा करोतु हंतु पाप्मानं यो स्मान्द्वे
ष्टि ॥ सजोषा इंद्र सगणो मरुद्भिः सोमं पिब वृत्रहञ्छूर विद्वान् ॥ जहि शत्रूँ
रप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥ ये देवाः पुरःसदो ग्निनेत्रा रक्षो
हणस्ते नः पांतु ते नो वंतु तेभ्यो नमस्तेभ्यः स्वाहा ॥ ये देवा दक्षिणसदो यमने
त्रा रक्षोहणस्ते नः पांतु ० ॥ ये देवाः पश्चात्सदः सवितृनेत्रा रक्षोहणस्ते नः
पांतु ० ॥ ये देवा उत्तरसदो वरुणनेत्रा रक्षोहणस्ते ० ॥ ये देवा उपरिषदो बृहस्प राम्
तिनेत्रा रक्षोहणस्ते ० ॥ अग्नये रक्षोघ्ने स्वाहा ॥ यमाय रक्षोघ्ने स्वाहा ॥ सवि ॥ ७ ॥

सवित्रेरक्षोघ्नेस्वाहा।।वरुणायरक्षोघ्ने०।।ब्रहस्पतयेदुवस्वतेरक्षो०।।अ
ग्निरायुष्मान्त्सवनस्पतिभिरायुष्मान्तेनत्वायुषायुष्मंतंकरोमि।।सोमआ
युष्मान्त्सऊषधीभिरायुष्मांन्त्संन्तेनत्वायु०।।यज्ञआयुष्मान्त्सदक्षिणाभि
रायुष्मांतेनत्वा०।।ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तेन०।।देवाआयुष्मंतस्ते
मृतेनायुष्मंतस्तेनत्वायुषायुष्मंतकारोमि।।यावामिंद्रावरुणायतव्यातनू
स्तयेमऽंहसोमुंचतं।।यावामिंद्रावरुणासहस्यातनू०।।यांवामिंद्रांवरुणा
रक्षस्यातनू०।।यावामिंद्रावरुणातेजस्यातनू०।।योवामिंद्रावरुणावग्नौ
स्रामस्तंवामेतेनावयजे।।योवामिंद्रावरुणाद्विपात्सुपशुषुस्रामस्तं०।।यो

उ॰शां॰ वामिंद्रावरुणा चतुष्पात्सु पशुषु स्रामस्तं॰॥ योवामिंद्रावरुणा गोष्ठे स्रामस्तं
॥ ८ ॥ ॰॥ योवामिंद्रावरुणा गृहेषु स्राम॰ योवामिंद्रावरुणाप्सु स्राम॰॥ योवामिंद्रा
वरुणौषधीषु स्राम॰॥ योवामिंद्रावरुणा वनस्पतिषु स्राम॰॥ अग्नेयशस्वि
न्यशसेममर्पयेंद्रावतीमपचितीमिहावह॥ अयंमूर्धा परमेष्ठी सुव
र्चीः समानानामुत्तमश्लोको अस्तु॥ भद्रं पश्यंत उपसेदुरग्रे तपोदीक्षामृ
षयः सुवर्विदः॥ ततः क्षत्रं बलमोजश्च जातं तदस्मै देवा अभिसंनमंतु॥ धा
ता ताविधाता परमोत संदृक्प्रजापतिः परमेष्ठी विराजा॥ स्तोमाश्छंदांसि
निविदो म आहुरेतस्मै राष्ट्रमभिसंनमाम॥ अभ्यावर्तध्वमुपमेत साकं राम्
मयपं शास्ताधिपतिर्वो अस्तु॥ अस्य विज्ञानमनुसंरभध्वमिमं पश्चा॥ ८ ॥

दनु जीवाथ सर्वे॥ ऋताषाडृतधामाग्निर्गंधर्वस्तस्यौषधयोप्सरस ऊ
र्जो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पांतु तस्मै स्वाहा ताभ्यः स्वाहा
संहितो विश्वसामा सूर्यो गंधर्वस्तस्य मरीचयोप्सरस आयुवः सुषुम्नः
सूर्यरश्मिश्चंद्रमा गंधर्वस्तस्य नक्षत्राण्यप्सरसो बेकुरयो भुज्युः सुपर्णो य
ज्ञो गंधर्वस्तस्य दक्षिणा अप्सरसस्तवाः प्रजापतिर्विश्वकर्मा मनो गंध
र्वस्तस्यर्क्सामान्यप्सरसो वन्हय इषि विश्वव्यचा वातो गंधर्वस्तस्यापो प्स रो
रसो मुदा भुवनस्य पते यस्य त उपरि गृहा इह च॥ स नो रास्वाज्यानिं रा
यस्पोषं सुवीर्यं संवत्सरीणां स्वस्तिं॥ परमेष्ठ्यधिपतिर्मृत्युर्गंधर्वस्त
स्य विश्वमप्सरसो भुवः सुक्षितिः सुभूतिर्भद्रकृत्सु वर्वान्पर्जन्यो गं

स्य

उ॰ शां॰ धर्वस्तं विद्युतो प्सरसोरुचोदूरे हेतिरम्दउयोमृत्युर्गंधर्वस्तस्य प्रजाअ

॥ १ ॥ प्सरसोभीरुवश्वारुः कृपणकोशीकामोगंधर्वस्तस्याधयोप्सरसः

शोचयंतीर्नामसइदं ब्रह्मक्षत्रं पातुताइदं ब्रह्मक्षत्रं पांतुतस्मै स्वाहा

ताभ्यःस्वाहासनोभुवनस्यपतेयस्यतउपरिगृहाइहच॥उरुब्रह्म

णेस्मैक्षत्रायमहिशर्मयछ॥नमोअस्तुसर्पेभ्योयेकेचपृथिवी

मनु॥येअंतरिक्षेयेदिवितेभ्यःसर्पेभ्योनमः॥येदोरोचनेदिवोये

पु वासूर्यस्यरश्मिषु॥येषामप्सुसदः कृतंतेभ्यःसर्पेभ्योनमः॥याइ

धाना षवोयातुनांयेवावनस्पतीॅंरनु॥येवावटेषुशेरतेतेभ्यःसर्पेभ्योन राम्

मः॥अयंपुरोहरिकेशःसूर्यरश्मिस्तस्यरथगृत्सश्चरथौजाश्चसे॥ ९

नानि ग्रामण्यौ पुंजिकस्थला च क्रतस्थला चाप्सरसौ यातुधाना हेती रक्षांऽ
सि प्रहेतिस्तेभ्यो नमस्ते नो मृडयंतु ते द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधामि
॥ अयं दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानि ग्रामण्यौ
मेनका च सहजन्या चाप्सरसौ दंक्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेति
स्तेभ्यो ०॥ अयं पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च सेनानि
ग्रामण्यौ प्रम्लोचंती चानुम्लोचंती चाप्सरसौ सर्पा हेतिर्व्याघ्राः प्रहेतिस्ते
भ्यो ०॥ अयमुत्तरात्संयद्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानि ग्रामण्यौ
विश्वाची च घृताची चाप्सरसावापो हेतिर्वातः प्रहेतिस्तेभ्यो नमस्ते ०॥ अ
यमुपर्यर्वाग्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानि ग्रामण्यावुर्वशी

उ॰ ग्रां॰ चपूर्वचित्तीश्चाप्सुरसौ विद्युद्देति रवस्फूर्जन्नहेति स्तेभ्योनमस्तेनो॰०॥ आशुः
१० शिशानोवृषभोनभीमोघनाघनः क्षोभणश्चर्षणीनां॥ संक्रंदनोनिमि
५ षएकवीरः शतंसेनाअजयत्साकमिंद्रः॥ संक्रंदनेनानिमिषेणजिष्णुना
युत्कारेणदुश्च्यवनेनधृष्णुना॥ तदिंद्रेणजयततत्सहध्वंयुधोनरइषुहस्तेनवृ
ष्णा॥ सइषुहस्तैः सनिषंगिभिर्वशीसंस्रष्टासयुधइंद्रोगणेन॥ संसृष्ट
जित्सोमपाबाहुशर्ध्यूर्ध्वधन्वाप्रतिहिताभिरस्ता॥ बृहस्पतेपरिदीयारथेन
रक्षोहामित्रांअपबाधमानः॥ प्रभंजंत्सेनाः प्रमृणोयुधाजयंनस्माकमे राम्
ध्यविताहरथानां॥ गोत्रभिदंगोविदंवज्रबाहुंजयंतमज्मप्रमृणंतमोजसा॥ इ ण
मंसजाताअनुवीरयध्वमिंद्रंसखायोनुसंरभध्वं॥ बलविज्ञायस्थवि १०

रः प्रवीरः सहस्वान्वाजीसमानउग्रः।। अभिवीरोअभिसत्वासहोजाजै
त्रमिंद्ररथमातिष्ठगोवित्।। अभिगोत्राणिसहसागाहमा
नोदायोवीरःशतमन्युरिंद्रः।। दुश्च्यवनःपृतनाषाडयुध्योस्माकंसेना
अवतुप्रयुत्सु।।इंद्रआसांनेताबृहस्पतिर्दक्षिणायज्ञःपुरएतुसोमः
।।देवसेनानामभिभंजतीनांजयंतीनांमरुतोयंत्वग्रं।।इंद्रस्यवृष्णो
वरुणस्यराज्ञोआदित्यानांमरुतांशर्धउग्रं।।महामनसांभुवन
च्यवानांघोषोदेवानांजयतामुदस्थात्।।अस्माकमिंद्रःसमृतेषुध्व
जे ष्वस्माकंयाइषवस्तावस्ताजयंतु।।अस्माकंवीराउत्तरेभवंतु

उ॰ मा॰ स्मानुदेवा अवताहवेषु ॥ उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां
॥ ११ ॥ मनांसि ॥ उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानांजयतांयंतुघोषः ॥
उप प्रेतजयतानरः स्थिरा वः संतु बाहवः ॥ इंद्रो वः शर्म यच्छतु नाधृ
ष्या यथासथ ॥ अवसृष्टा परापत शरव्ये ब्रह्मसंशिता ॥ गच्छा
मित्रान्प्रविश मैषां कंचनोच्छिषः ॥ मर्माणि ते वर्मभिश्छादयामि सो
मस्त्वा राजामृतेनाभिवस्तां ॥ उरोर्वरीयो वरिवस्ते अस्तु जयंतं
त्वामनुमदंतु देवाः ॥ यत्र बाणाः संपतंति कुमारा विशिखा इव ॥ इंद्रो ॥ राम ॥
नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु ॥ शं च मे मयश्च मे प्रियं च मे नुका ॥ ११ ॥

मश्चमेकामश्चमेसौमनसश्चमेभद्रंचमेश्रेयश्चमेवस्यश्चमेयशश्चमे
भगश्चमेद्रविणंचमेयंताचमेधर्ताचमेक्षेमश्चमेधृतिश्चमेविश्वंचमे
महश्चमेसंविच्चमेज्ञात्रंचमेसूश्चमेप्रसूश्चमेसीरंचमेलयश्चमऋतंच श्चमे
मेमृतंचमेयक्ष्मंचमेनामयच्चमेजीवातुश्चमेदीर्घायुत्वंमेनमित्रंच चं
मेभयंचमेसुगंचमेशयनंचमेसूषाचमेसुदिनंचमे॥ ममाग्नेवर्चोवि
हवेष्वस्तुवयंत्वेंधानास्तनुवंपुषेम॥ मह्यंनमंतांप्रदिशश्चतस्रस्त्वया
ध्यक्षेणपृतनाजयेम॥ ममदेवाविहवेसंतुसर्वइंद्रावंतोमरुतोवि
ष्णुरग्निः॥ ममांतरिक्षमुरुगोपमस्तु मह्यंमेवातःपवतांकामेअस्मि

उ॰ शां॰ ॥ नः॥ मयिदेवाद्रविणमायजंतांम्याशीरस्तु मयिदेवहूतिः॥ दैव्याहोताराव
॥ १२॥ निषंतपूर्वेरिशास्यामतनुवास्कवीराः॥ महायजंतुममयानिहव्याकू
तिःसत्यामनसोमेअस्तु॥ एनोमानिगांकतमच्चनाहंविश्वेदेवासो
अधिवोचतामे॥ देवीःषडुर्वीरुरूणःकृणोतविश्वेदेवासइहवीरय
ध्वं॥ माहास्महिप्रजयामातनूभिर्मारधामद्विषतेसोमराजन्॥ अ
ग्निर्मन्युंप्रतिनुदन्पुरस्तादब्धोगोपाःपरिपाहिनस्त्वं॥ प्रत्यंचोयं
तुनिगुतःपुनस्तेमैषांचित्तंप्रबुधाविनेशत्॥ धाताधातॄणांभुवन राम
स्ययस्पतिर्देवंसवितारमभिमातिषाहं॥ इमंयज्ञमश्विनोभाव ॥ १२॥

हस्पतिर्देवाः पांतु यजमानं नैने र्थांतु॥ उरुव्यचा नो महिषः शर्मयंसद स्मिन्हवे पुरुहूतः पुरुक्षु॥ स नः प्रजायै हर्यश्व मृडयेंद्र मा नो रिरिषो मा परादाः॥ ये नःसपत्ना अपते भवंतिंद्राग्निभ्यामवबाधामहे तान्॥ वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन्॥ अर्वांचमिंद्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः॥ इमं नो यज्ञं विहवे जुषस्वास्य कुर्मो हरिवो मेदिनं त्वा॥ अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पांचजन्यं बहवः समिंधते॥ विश्वस्यां विशि प्रविविशि वाꣳसमीमहे स नो मुंचत्वꣳहसः॥ यस्येदं प्राणं निमिषद्य देजति य

उ॰ शं स्य जातं जनमानं च केवलं॥ स्तोमप्निं नाथितो जोहवीमि स नो॰॥ इं
॥२३॥ द्रस्य मन्ये प्रथमस्य प्रचेतसो वृत्रघ्नः स्तोमा उप मामुपागुः॥
यो दाशुषः सुकृतो हवमुपगंता स नो॰॥ यः संग्रामं नयति संवशी युधे यः
पुष्टानि संसृजति त्रयाणि॥ स्तोमींद्रं नाथितो जोहवीमि स नो॰ मन्वे
२ वां मित्रावरुणा तस्य वित्तं सत्यौजसा दृंहणा यं नुदेथे॥ या राजानं
सरथं याथ उग्रा ता नो मुंचतमागसः॥ यो वां रथ ऋजुरश्मिः सत्य
धर्मा मिथुश्चरंतमुपयाति दूषयन्॥ स्तोमिंत्रावरुणा नाथितो मि
जोहवीमि तौ नो मुंचतमागसः॥ वायोः सवितुर्विदथानि मन्महे या रा
वात्मन्वद्विभृतो यौ च रक्षतः॥ यो विश्वस्य परिभूः बभूवतुः स्तौ नो मुंचतमा॰ २३
मुवं

उपश्रेष्ठा न आशिषो देवयोर्धामन्नस्थिरन् ॥ स्तोमेभिर्वायुं सवितारं ना
थितो जोहवीमि तौ नो मुंचतमांगसः ॥ रथीतमौ रथीनामह्व ऊतये शु
भंगमिष्ठौ स्कयमेभिरश्वैः ॥ ययोर्वां देवौ देवेष्वनिशितमोज स्तौ नो मुं
चतमांगसः ॥ यदयातं वहतुं सूर्यायास्त्रिचक्रेण संसदमिछमा
नौ ॥ स्तोमैर्देवावश्विनौ नाथितो जोहवीमि तौ नो मुंचतमांगसः ॥
मरुतां मन्वे अधि नो ब्रुवंतु प्रेमां वाचं विश्वामवंतु विश्वे ॥ आशून्हु
वे स्कयमानूतये ते नो मुंचंत्वेनसः ॥ तिग्ममायुधं वीडितं सहस्वद्दिव्यं
शर्धः पृतनासु जिष्णु ॥ स्तोमैर्देवान्मरुतो नाथितो जोहवीमिते

उ॰ शां॰ ॥ नो मुंचंत्वेनसः॥ देवानां मन्वे अधि नो ब्रुवंतु प्रेमां वाचं विश्वाम वंतु
॥ २४ ॥ विश्वे॥ आग्नेन्द्रं वे स्कय मा नूतये ते नो मु चंत्वेनसः॥ यदिदं मांभि
रोचति पोरुषेयेण दैव्येन॥ स्तौमि विश्वां देवान्नाथितो जोह
वीमि ते नो मुचंत्वेनसः॥ अनु नो द्यांमतिर्यज्ञंदेवेषु मन्यतां
॥ अग्निश्च हव्यवाहनो भवतां दाशुषे मयः॥ अन्विदनुमते त्वं
मन्यासै शं चस्कृ नः धि॥ क्रत्वे दक्षाय नो हिनु प्रण आयूंषि ॥ राम॰ ॥
तारिषः॥ वैश्वानरो न ऊत्याप्रयातु परावतः॥ अग्निरुक्थे ॥ २४ ॥

नबाहसा॥ पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवे
श॥ वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तं॥
अँ ये ये प्रथेताममितेभिरोजोभिर्ये प्रतिष्ठे अभवतां वसूनां॥ स्तोमि
नाथितो द्यावापृथिवी जोहवीमि ते नो मुंचतमंहसः॥ उर्वी रोदसी वरिवः
कृणोतं क्षेत्रस्य पत्नी अधि नो ब्रूयातं॥ स्तोमि द्यावापृथिवी
यत्ते वयं पुरुषत्रा यविष्ठाविद्वांसश्चकृमा कच्चनागः॥ कृ
धी स्वस्माँ अदितेरनागा व्येनांसि शिश्रथो विष्वग

उ॰ शां न्ने।।यथाहतद्वसवोगौर्यंचित्पदिषितामसुंचतायजत्राः।। इवात्वमस्मत्र
२५ हः मुंचाव्यंहः प्रातार्यग्नेप्रतरांन आयुः।। समीचीनामासिप्राचीदिक्तस्या
स्तेग्निरधिपतिरसितोरक्षितायश्चाधिपतिर्यश्चगोप्ताताभ्यांनम श्वा
स्तौनोमृडयतांतेयंद्विष्मोयश्चनोद्वेष्टितंवौजंभेदधामि।।ओजस्वि
नीनामासिदक्षिणादिक्तस्यास्तइंद्रोधिपतिःपृदाकूरक्षिताय
श्चाधिपतिर्यश्चगोप्ताताभ्यां०।। प्राचीनामासिप्रतीचीदिक्तस्या ।।राम।।
स्तेसोमोधिपतिस्वजोरक्षितायश्चाधिपतिर्यश्चगोप्ताता०।। ।।२५।।

मा स्ते

अवस्थावा नास्युदीची दिक्तस्यास्ते वरुणोधिपतिस्तिरश्चराजीरक्षिताय
श्चाधिपतिर्यश्च गोप्ता ताभ्यां०॥ अधिपत्नी नामासि बृहतीक्तस्या दि
स्ते बृहस्पतिरधिपतिश्श्वित्रोरक्षिता यश्चाधिपतिर्यश्च गोप्ता ०॥
वशीनी नामासीयं दिक्तस्यास्ते यमोधिपतिः कल्माषग्रीवोरक्षि
तायश्चाधिपतिर्यश्च गोप्ता ०॥ हेतयो नामस्थ तेषां वः पुरो गृहा अ हा
ग्निर्व इषवः सलिलो वातनामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्वि
ष्मो यश्च नो द्वेष्टि तं वो जंभे दधामि॥ निलिंपा नामस्थ तेषां वो द

उ॰ शं॰ क्षिणा गृहाः पितरो वइ षवः सगरो वात नामं तेभ्यो वो न०॥ वज्रिणो
॥१६॥ नामस्थ तेषां वः पश्चा द्गृहाः स्वप्नो वइ षवो यक्ष्म रो वात नामं ते
भ्यो वो नम०॥ अवस्था वा नो नामस्थ तेषां वउ नराद्गृहा
आपो वइ षवः समुद्रो वात नामं तेभ्यो वो न०॥ अधिपतयो ना
मस्थ तेषां वउपरि गृहा वर्षं वइ षवो वस्वान्वात नामं तेभ्यो वो
नमस्ते नो मडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधामि॥ क
व्या नामस्थ पार्थिवास्ते षां व इह गृहा अन्नं वइ षवो निमिषो वा ॥१६॥ राम

तनामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधामि ॥ शतायुधाय शतवीर्याय शतोतये भिमातिषाहे ॥ शतं त
यो नः शरदो अजीतानिंद्रो नेषदतिदुरितानि विश्वा ॥ ये चत्वारः
पथयो देवयाना अंतरा द्यावापृथिवी वियंति ॥ तेषां यो अज्यानिम
जीतिमावहात्तस्मै नो देवाः परिदत्तेह सर्वे ॥ ग्रीष्मो हेमंत उत नो
वसंतः शरद्वर्षाः स्कवितं नो अस्तु ॥ तेषामृतूनां शतशा
रदानां निवात एषामभये स्याम ॥ इदुवत्सराय परिवत्स

उ·द· रायसंवत्सरायकृणुताबृहंनमः॥तेषांवयं सुमतौयज्ञिया
१७॥ नांज्योगजीताअहताःस्याम॥भद्रान्नःश्रेयःसमनैष्टदेवास्त्व
यावसेनसमशीमहित्वा॥सनोमयोभूःपितोआविशस्वशं
तोकायतनुवेस्योनः॥भूतंभव्यंभविष्यद्वषट्स्वाहानमऋ
क्सामयजुर्वषट्स्वाहानमोगायत्रीत्रिष्टुब्जगतीवषट्स्वा
हानमःपृथिव्यंतरिक्षंद्यौर्वषट्स्वाहानमोग्निर्वायुःसूर्यो॥१८॥
वषट्स्वाहानमःप्राणोव्यानोपानोवषट्स्वाहानमोन्नंकृ राम्

षिर्दक्षिर्वषट्स्वाहा नमः पिता पुत्रः पौत्रो वषट् स्वाहा नमो
भूर्भुवःस्वर्वषट्स्वाहा नमः॥ इंद्रो दधीचो अस्थभिः॥ वृत्रा
ण्यप्रतिष्कुतः॥ जघान नवतीर्नव॥ इछन्नश्वस्य यछिरः
८ ॥पर्वतेषपश्रितं॥ तद्विदछर्यणावति॥ अत्राह गोरमन्वत॥
नामत्वष्टुरपीच्यं॥ इत्थाचंद्रमसो गृहे॥ इंद्रमिद्गाथिनोबृ
हत्॥ इंद्रमर्केभिरर्किणः॥ इंद्रं वाणीरनूषत॥ इंद्र इद्धर्योः ष
सचा॥ संमिश्लआवचोयुजा॥ इंद्रो वज्री हिरण्ययः॥ इंद्रो

उ॰ ऋ॰ दीर्घायप्रचक्षसे॥ आसूर्यंरो हयद्दिवि॥ विगोभिरद्रिमैरयत्॥

॥१८॥ व॥ इंद्रवाजेषुनोअव॥ सहस्त्रप्रधनेषुच॥ उग्रउग्राभिरूतिभिः

॥ तमिंद्रंवाजयामसि॥ महेवृत्रायहंतवे॥ सवृषावृषभोभुव

त्॥ इंद्रःसदामनेकृतः॥ ओजिष्ठःसबलेहितः॥ द्युम्नीश्लोकी

ससोम्यः॥ गिरावज्रोनसंभृतः॥ सबलोअनपच्युतः॥ ववक्षुरुग्रोअस्तृतः॥ चक्षुषोहेते मनसोहेते॥ वाचोहेते ब्रह्मणो ॥१८॥

हेते॥ योमाघायुरभिदासति॥ तमग्नेमेन्यामेनिंकृणु॥ योमा राम

चक्षुषा यो मनसा ॥ यो वाचा वलेणाघायुरभिदासति ॥ तयाग्ने त्वं मेन्या
॥ अमुमेमेनिं कृणु ॥ यत्किं चासौ मनसा यश्च वाचा ॥ यज्ञैर्जुहोति य
जुषा हविर्भिः ॥ तन्मृत्युर्निर्ऋत्या संविदानः ॥ पुरा दिष्टदाहुती
रस्य हंतु ॥ यातुधाना निर्ऋतिरादु रक्षः ॥ ते अस्य घ्नंत्वनृतेन सत्यं
॥ इंद्रेषिता आज्यमस्य मथ्नंतु ॥ मा तत्समृध्दि यदसौ करोति ॥
हन्मि ते हं कृतं हविः ॥ यो मे घोरमचीकृतः ॥ अपांचौत उभौ बा
हू ॥ अपनह्याम्यास्यं ॥ अपनह्यामि ते बाहू ॥ अपनह्याम्यास्यं ॥

उ·शां· अग्नेर्देवस्य ब्रह्मणा॥ सर्वं तेव धिषं कृतं॥ पुरामुष्य वषट्कारात्॥
१९॥ यज्ञं देवेषु नस्कृधि॥ स्विष्टमस्माकं भूयात्॥ मास्मान्प्रापन्नरातयः
॥ अंतिदूरे सतो अग्ने॥ भ्रातृव्यस्याभिदासतः॥ वषट्कारेण वज्रे
ण॥ कृत्यां हन्मि कृतामहं॥ यो मा नक्तं दिवा सायं॥ प्रातश्चाह्नो नि
पीयति॥ अद्यातमिंद्र वज्रेण॥ भ्रातृव्यं पादयामसि॥ १॥ प्राणो र
क्षति विश्वमेजत्॥ इर्यो भूत्वा बहुधा बहूनि॥ स इत्सर्वं व्यानशे॥ राम्
यो देवो देवेषु विभूरंतः॥ आवृदूदात्क्षेत्रियध्वगद्वृषा॥ तमित्प्रा॥ १९॥

णं मनसोपशिक्षत ॥ अग्नेंदेवानामिदमन्नुनोहविः ॥ मनसश्चि
त्तेदं ॥ भूतंभव्यंचगुप्यते ॥ तत्विद्देवेष्वग्नियं ॥ आनएतुपुरश्च
रं ॥ सहदेवैरिमंहवं ॥ मनश्श्रेयसिश्रेयसि ॥ कर्मन्यज्ञपतिंदधत्
॥ जुषतांमेवागिदंहविः ॥ विराड्देवीपुरोहिता ॥ हव्यवाडनपा
यिनी ॥ ययारूपाणिबहुधावदंति ॥ पेशांसिदेवाःपरमे
जनित्रे ॥ सानोविराडनपस्फुरंती ॥ वाग्देवीजुषतामिदंह
विः ॥ चक्षुर्देवानांज्योतिरमृतेन्यक्तं ॥ अस्यविज्ञानायबहुधा

३३.शां. निधीयते॥तस्येसुम्नमशीमहि॥मानोहासीद्विचक्षणं॥आ
॥२०॥ युरिन्नुःप्रतीयतां॥अनंधाश्चक्षुषावयं॥जीवाज्योतिरशीम
हि॥मानोहासीद्विचक्षण॥स्रुवर्ज्योतिरुतामृतं॥श्रोत्रेणभ
द्रमुतश्रृण्वंतिसत्यं॥श्रोत्रेणवाचंबहुधोद्यमानं॥श्रोत्रे
णमोदश्चमहश्चभूयते॥श्रोत्रेणसर्वादिशआश्रृणोमि॥
येनप्राच्याउतदक्षिणा॥प्रतीच्यैदिशःश्रृण्वंत्युत्तरात्॥ राम
सर्वंतदिश्रोत्रेबहुधोद्यमानं॥अरान्ननेमिःपरितावभूव॥॥२०॥

सिंहे व्याघ्र उत या पृदाको॥ त्विषिरग्नौ ब्राह्मणे सूर्ये या॥ इंद्रं या दे
वी सुभगा जजान॥ सा न आगन्वर्चसा संविदाना॥ या राजन्ये दुं
दुभावायतायां॥ अश्वस्य क्रंदे पुरुषस्य मायौ॥ इंद्रं॰ सा न आ॰ या
हस्तिनि द्वीपिनि या हिरण्ये॥ त्विषिरश्वेषु पुरुषेषु गोषु॥ इंद्रं॰ सा
न आ॰॥ रथे अक्षेषु वृषभस्य वाजे॥ वाते पर्जन्ये वरुणस्य शुष्मे॥ इं
द्रं या॰॥ सा न॰॥ राडसि विराडसि॥ संम्राडसि स्वराडसि॥ इंद्राय त्वा
तेजस्वते तेजस्वंतं श्रीणामि॥ इंद्राय त्वौजस्वत ओजस्वंतं श्रीणामि

उ॰ शां॰॥ णामि॥ इंद्राय त्वा पयस्वंतं पयस्वंतं एं श्रीणामि॥ इंद्राय त्वायुष्मंतआ
॥२१॥ युष्मंतं एं श्रीणामि॥ तेजोसि। तत्ते प्रयच्छामि। तेजस्वदस्तु मेमुखं। तेज
स्वच्छिरो अस्तु मे॥ तेजस्वान्विश्वतः प्रत्यङ्॰। तेजसा संपिपृग्धि मा। ओ
जोसि। तत्ते प्रयच्छामि। ओजस्वदस्तु मे मुखं। ओजस्वच्छिरो अस्तु मे। ओ
जस्वान्विश्वतः प्रत्यङ्॰। ओजसा संपिपृग्धि मा। पयोसि। तत्ते प्रयच्छा
मि। पयस्वदस्तु मे मुखं। पयस्वच्छिरो अस्तु मे। पयस्वान्विश्वतः प्रत्यङ्॥ राम्
। पयसा संपिपृग्धि मा॥ आयुरसि। तत्ते प्रयच्छामि। आयुष्मदस्तु मेमु॥ २१॥

रवं। आयुष्मच्छिरो अस्तु मे। आयुष्मान्विश्वतः प्रत्यङ्। आयुषा संपिर
ग्धिमा। इमममग्न आयुषे वर्चसे कृधि॥ प्रियं रेतो वरुण सोम राजन्।
मातेवास्मा अदिते शर्म यच्छ। विश्वेदेवा जरदष्टिर्यथासत्॥ आयुरसि
विश्वायुरसि। सर्वायुरसि सर्वमायुरसि॥ यतो वातो मनोजवाः। यतः
क्षरंति सिंधवः॥ तासां त्वा सर्वासां रुचा। अभिषिंचामि वर्चसा
सि। समुद्र इवासि गंह्मना। सोम इवास्यदाभ्यः। अग्निरिव विश्वतः प्रत्यङ्
। सूर्य इव ज्योतिषा विभूः। अपां यो द्रवणे रसः। तमहमस्मा आमुष्यो

उ॰ शां॰ यणाय॥ तेजसे ब्रह्मवर्चसाय गृह्णामि॥ अपां यऊर्मौ रसः॥ तमहमस्मा

॥२२॥ आमुष्यायणाय॥ ओजसे वीर्याय गृह्णामि॥ अपां यो मध्यतो रसः॥ त

महमस्मा आमुष्यायणाय॥ पुष्ट्यै प्रजननाय गृह्णामि॥ अपां यो यज्ञि

यो रसः॥ तमहमस्मा आमुष्यायणाय॥ आयुषे दीर्घायुत्वाय गृह्णामि॥

अहमस्मि प्रथमजा ऋतस्य॥ पूर्वं देवेभ्यो अमृतस्य नाभिः॥ यो मा द

दाति स इदेव मावाः॥ अहमन्नमन्नमदन्तमद्मि॥ पूर्वमग्नेरपि दहत्वं राम

सा॰ १ नं॥ यत्तौ हौतैं अहमुत्तरेषु॥ व्यात्तमस्य पशवः सुजंभौ॥ पश्यंति धी॥ २२॥

गः प्रचरंति पाकाः॥ जहाम्यन्यं न जहाम्यन्यं॥ अहमन्नं वशमिच्च
रामि॥ समानमर्थं पर्येमि भुंजत्॥ को मामन्नं मनुष्यो दयेत परांके
अन्नं निहितं लोक एतत्॥ विश्वैर्देवैः पितृभिर्गुप्तमन्नं॥ यद
द्यते लुप्यते यत्परोप्यते॥ शततमी सा तनूर्मे बभूव॥ महांतौ चरू
सकृद्दुग्धेन पप्रौ॥ दिवं च पृश्निं पृथिवीं च साकं॥ तत्संपिबंतो न
मिनंति वेधसः॥ नैतद्भूयो भवति नो कनीयः॥ अन्नं प्राणम
न्नमपानमाहुः॥ अन्नं मृत्युं तमु जीवातुमाहुः॥ अन्नं ब्रह्माणो

उ० त्रां० जरसं वदंति॥ अन्नमाहुः प्रजननं प्रजानां॥ मोघमन्नं विंदते अप्रचे
२३॥ ताः॥ सत्यं ब्रवीमि वध इत्स तस्य॥ नार्यमणं पुष्यति नो सखायं॥ केव
लाघो भवति केवलादी॥ अहं मेघ स्तनयन्वर्षन्नस्मि॥ मामदंत्यह
मद्म्यन्यान्॥ अहंऽसदमृतो भवामि॥ मदादित्या अधि सर्वे तपंति
ति ।देवीं वाचमजनयंत देवाः॥ तां विश्वरूपाः पशवो वदंति। सा नो मंद्रेषमू
र्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु॥ यद्वाग्वदंत्यविचेतनानि॥ राष्ट्
राष्ट्री देवीनां निषसाद मंद्रा। चतस्र ऊर्जं दुदुहे पयांऽसि॥ २३॥

क्वस्विदस्याः परमं जगाम ॥ अनंतामंताद्धिनिर्मितां महीं ॥ यस्यां
देवा अदधुर्भोजनानि ॥ एकाक्षरां द्विपदां षट्पदां च ॥ वाचं देवा
उपजीवंति विश्वे ॥ वाचं देवा उपजीवंति विश्वे ॥ वाचं गंधर्वाः पश
वो मनुष्याः ॥ वाचीमा विश्वा भुवनान्यर्पिता ॥ सा नो हवं जुषतां
मिंद्रपत्नी ॥ वागक्षरं प्रथमजा ऋतस्य ॥ वेदानां मातामृतस्य नाभिः
॥ सा नो जुषाणोप यज्ञमागात् ॥ अवंती देवी सुहवा मे अस्तु ॥
रु यामृषयो मंत्रकृतो मनीषिणः ॥ अन्वैच्छं देवास्तपसा श्रमेण ॥ तां दे

उ·ब्रा· वींवाचंएं हविषायजामहे॥ सानोदधातु स्कृतस्यलोके॥ त्वेत्वेरि
१२४॥ वाक्परिमितापदानि॥ तानि विदुर्ब्राह्मणायेमनीषिणः॥ गुहा
त्रीणिनिहितानेंगयंति॥ तुरीयंवाचोमनुष्यावदंति॥ श्रत्धयाग्निः
विंद समिध्यते॥ श्रत्धयाहूयतेहविः॥ श्रत्धांभगस्यमूर्धनि॥ वच
सावेदयामसि॥ प्रियंएंश्रत्धेददतः॥ प्रियंएंश्रत्धेदिदासतः॥
प्रियंभोजेषुयज्वस्व॥ इदंमउदितंकृधि॥ यथादेवाअसुरेषु॥ श्र
त्धामुग्रेषुचक्रिरे॥ एवंभोजेषुयज्वस्व॥ अस्माकमुदितंकृधि॥ २४ राम

उपा ह्

श्रद्धांदेवायजमाना॥ वायुगोपासते॥ श्रद्धांहृदय्ययाकूत्या॥
श्रद्धयाहूयतेहविः॥ श्रद्धांप्रातर्हवामहे॥ श्रद्धांमध्यंदिनंपरि॥
श्रद्धांसूर्यस्यनिम्रुचि॥ श्रद्धेश्रद्धापयेँमो॥ श्रद्धादेवानधिव
स्ते॥ श्रद्धाविश्वमिदंजगत्॥ श्रद्धांकामस्यमातरं॥ हविषावर्ध
यामसि॥ ब्रह्मजज्ञानंप्रथमंपुरस्तात्॥ विसीमतःसुरुचोवे
नआवः॥ सबुध्न्याउपमाअस्यविष्ठाः॥ सतश्चयोनिमसतश्च
विवः॥ पिताविराजामृषभोरयीणां॥ अंतरिक्षंविश्वरूपआवि

उ॰ शा॰ वेश॥ तमर्कैरभ्यर्चंतिवत्सं॥ ब्रह्मसंतं ब्रह्मणावर्धयंतः॥ ब्रह्मदेवानज
२५ नयत्॥ ब्रह्मविश्वमिदं जगत्॥ ब्रह्मणः क्षत्रं निर्मितं॥ ब्रह्म ब्राह्मण
आत्मना॥ अंतरस्मिन्निमेलोकाः॥ अंतर्विश्वमिदं जगत्॥ ब्रह्मैव
भूतानां ज्येष्टं॥ तेन कोर्हतिस्पर्धितुं॥ ब्रह्मंदेवास्त्रयस्त्रिंशत्॥ ब्रह्म ४
न्निंद्रप्रजापती॥ ब्रह्मन्ह विश्वाभूतानि॥ नावीवांतःसमाहिता॥ च
तस्रआशाःप्रचरंत्वग्नयः॥ इमन्नौयज्ञं नयतुप्रजानन्॥ घृतंपिन्वं राम
नजरंसुवीरं॥ ब्रह्मसमिद्भवत्याहुतीनां॥ आगावोअग्मन्नुतभ २५

ऽमक्रन्॥ सीदंतुगोष्ठेरणयंत्वस्मे॥ प्रजावतीःपुरुरूपाइहस्युः॥ इं
द्रायपूर्वीरुषसोदुहानाः॥ इंद्रोयज्वनेपृणतेचशिक्षति॥ उपेद्दा
तिनस्वंमुषायति॥ भूयोभूयोरयिमिदस्यवर्धयन्॥ अभिन्नेखि
ल्येनिदधातिदेवयुं॥ नतानशंतिनदभातितस्करः॥ नैनाअमि
त्रोव्यथिरादधर्षति॥ देवांश्चयाभिर्यजतेददातिच॥ ज्योगि
त्ताभिःसचतेगोपतिःसह॥ नताअर्वारेणुककाटोअश्नुते॥ न
संस्कृतत्रमुपयंतिताअभि॥ उरुगायमभयंतस्यताअनु॥

॥उं॰ शां॰ गावो मर्त्यस्य विश्वरं ति यज्वेनः॥ गावो भगो गाव इंद्रो मे अच्छातु॥ गा
॥२६॥ वः सोमस्य प्रथमस्य भक्षः॥ इमा या गावः सजनास इंद्रः॥ इच्छामीत्धृ
दामनसा चिदिंद्रं॥ यूयं गावो मेदयथा कृशंचित्॥ अश्रीलं चित्कृणु
था सुप्रतीकं॥ भद्रं गृहं कृणुथ भद्रवाचः॥ बृहद्वो वय उच्यते सभासु॥
प्रजावतीः सूयवसं रिशंतीः॥ शुद्धा अपः सुप्रपाणे पिबंतीः॥ मावस्ते
न ईशत माघशंसः॥ परिवो हेती रुद्रस्य वृंज्यात्॥ उपेदमुपपर्चनं॥ राम
आसु गोषूप पृच्यतां॥ उपर्षभस्य रेतसि॥ उपेंद्र तव वीर्ये॥ तौ सूर्याचं ॥२६॥

५

द्रमसाविश्वभृत्तमामहत्॥तेजोवस्कमद्ग्रांतौदिवि॥सामात्मानाच
रतःसामचारिणा॥ययोर्व्रतंनममेजातुदेवयोः॥उभावंतौपरि
यातअर्म्या॥दिवोनरश्मीपूंस्त्वनुतोव्यर्णवे॥उभाभुवंतीभुवना
कविक्रतू॥सूर्यानचंद्राचरतोहतामती॥पतीद्युमद्विश्वविदाउ
भादिवः॥सूर्याउभाचंद्रमसाविचक्षणा॥विश्ववाराववरिवोभा
वरेण्या॥तानोवतंमतिमंतामहिव्रता॥विश्ववपरीप्रतरणा
तरंता॥सुवर्विदादृशयेभूरिरश्मी॥सूर्याहिचंद्रावस्केलेष

उ·शां· दर्शिता॥ मनस्विनोभानुचरतोनुसंदिवं॥ अस्यश्रवोनद्यःस
॥२७॥ प्तबिभ्रति॥ द्यावाक्षामापृथिवीदर्शतंवपुः॥ अस्मेसूर्याचंद्रम
भि सा॰ [illegible] चक्षे॥ श्रद्धेकमिंद्र[illegible]रतोक्विवतुरं॥ पूर्वापरंचरतोमायये च
तौ॥ शिशूक्रीडंतौपरियातोअध्वरं॥ विश्वान्यन्योभुवनाभिच
ष्टे॥ ऋतूनन्योविदधज्जायतेपुनः॥ हिरण्यवर्णाःशुच[illegible]यःपा
वकायासुजातःकश्यपोयास्विंद्रः॥ अग्निंयागर्भंदधिरेवि राम्र
रूपाःस्तानआपःशंस्योनाभवंतु॥ यासांराजावरुणो ॥२७॥

यातिमध्ये सत्यान्रते अंवपश्यंजनानां॥ मधुश्चुतः शुचयोयाः
पावकास्तानआपः शंस्योनाभवंतु॥ यासांदेवादिविकृण्वंति
भक्षंया अंतरिक्षेबहुधाभवंति॥ याःपृथिवींपयसोंदंतिशु
क्रास्तानआपः शंस्योनाभवंतु॥ शिवेनमाचक्षुषाप
श्यतापः शिवयातनुवोपस्पृशातत्वचंमे॥ सर्वांअग्नीं
रप्सुषदोहुवेवोमयिवर्चोबलमोजोनिधत्त॥ आपोभद्रा
घृतमिदापआसुरग्नीषोमौबिभ्रत्यापइत्ताः॥ तीव्रोर

उ॰शा॰ सोमधुएचामरंगमआमाम्राणेनसहवर्चसागनू॥ आदित्यश्यामसुतवो
२८॥ शरणोम्यामाघोषो गच्छतिवाड्.आसां॥ मन्येभेजानोअमतस्यतर्हिहि
रण्यवर्णाअतपंयदावः॥ नासदासीनोसदासीत्तदानीं॥ नासीद्र
जोनोव्योमापरोयत्॥ किमावरीवःकुहकस्यशर्मन्॥ अंभःकिमा
सीद्गहनंगभीरं॥ नमृत्युरमृतंतर्हिन॥ रात्रियाअन्हआसीत्प्रकेतः॥
आनीदवातंस्वधयातदेकं॥ तस्माध्दान्यंनपरःकिंचनास॥ तमआ राम
मासीत्तमसागूढमग्रेप्रकेतं॥ सलिलंसर्वमाइदं॥ तुच्छेनाभ्वपिहि॥ २८॥
मा

तंयदासीत्।। तमसस्तन्महिनाजायतैकं।। कामस्तदग्रेसमवर्त्तताधि
।। मनसोरेतः प्रथमंयदासीत्।। सतोबंधुमसतिनिरविंदन्।। हृदिप्र
तीष्याकवयोमनीषा।। तिरश्चीनोविततोरश्मिरेषां।। अधःस्विदा
२ सीदुपरिस्विदासीत्।। रेतोधाआसन्महिमानआसन्।। स्वधाअ ३
वस्तात्प्रयतिःपरस्तात्।। कोअद्धावेदकइहप्रवोचत्।। कुतआ
जाताकुतइयंविसृष्टिः।। अर्वाग्देवाअस्यविसर्जनाय।। अथाको
वेदयतआबभूव।। इयंविसृष्टिर्यतआबभूव।। यदिवादधेयदिवा

उ॰ शां न॥ यो अस्याध्यक्षः परमे व्योमन्॥ सो अंग वेद यदि वा न वे
२९ द॥ किंस्विद्वनं क उ स वृक्ष आसीत्॥ यतो द्यावापृथिवी नि
ष्टतक्षुः॥ मनीषिणो मनसा पृच्छतेदु तत्॥ यदध्यतिष्ठद्भुव
नानि धारयन्॥ ब्रह्म वनं ब्रह्म स वृक्ष आसीत्॥ यतो द्यावा
पृथिवी निष्टतक्षुः॥ मनीषिणो मनसा विब्रवीमि वः॥ ब्रह्मा
ध्यतिष्ठद्भुवनानि धारयन्॥ प्रातरग्निं प्रातरिंद्रं हवामहे॥
प्रातर्मित्रावरुणा प्रातरश्विना॥ प्रातर्भगं पूषणं ब्रह्मण राम २९

स्पतिं॥प्रातः सोममुत रुद्रं हुवेम॥प्रातर्जितं भगमुग्रं हुवेम
॥वयं पुत्रमदितेर्यो विधर्ता॥आध्रश्चिद्यं मन्यमानस्तुरश्चि
द्॥राजा चिद्यं भगं भक्षीत्याह॥भग प्रणेतर्भग सत्यराधः॥भ
गेमां धियमुदवा ददन्नः॥भग प्र णो जनय गोभिरश्वैः॥भग प्र नृ भि
भिर्नृवन्तः स्याम॥उतेदानीं भगवन्तः स्याम॥उत प्रपित्व उ
त मध्ये अह्नां॥उतोदिता मघवन्त्सूर्यस्य॥वयं देवानां सुम
तौ स्याम॥भग एव भगवाँ अस्तु देवाः॥तेन वयं भगवन्तः स्या

७ ०श्री०म ॥ तं त्वा भग सर्व इज्जोहवीमि ॥ स नो भग पुरएता भवेह ॥ समध्व
॥ रू० ॥ रायोषसो नमंत ॥ दधिक्रावेव शुचये पदाय ॥ अर्वाचीनं वसुविदं
भगं नः ॥ रथमिवाश्वा वाजिन आवहंतु ॥ अश्वावतीर्गोमतीर्न उषा
सः ॥ वीरवतीः सदमुछंतु भद्राः ॥ घृतं दुहाना विश्वतः प्रपीताः ॥ २६
यूयं पात स्वस्तिभिः सदा नः ॥ अग्निर्नः पातु कृत्तिकाः ॥ नक्षत्रं दे
वमिंद्रियं ॥ इदमासां विचक्षणं ॥ हविरासं जुहोतन ॥ यस्य भांति राम्
रश्मयो यस्य केतवः ॥ यस्येमा विश्वा भुवनानि सर्वा ॥ स कृत्ति ॥ रू० ॥

काभिरभिसंवसानः।। अग्निर्नैद्दिवःस्ह वितेदधातु।। प्रजाप
णी तेरोहिवेतुपत्नी।।विश्वरूपाबृहतीचित्रभानुः।।सानोयज्ञस्यस्हवि
तेदधातु।।यथाजीवेमशरदःसवीराः।।रोहिणीदेव्युदगात्पुरस्तात्
।।विश्वारूपाणिप्रतिमोदमाना।।प्रजापतिंहविषावर्धयंती।।प्रि
यादेवानामुपयातुयज्ञं।।सोमोराजामृगशीर्षेणआगन्।।शिवं
नक्षत्रंप्रियमस्यधाम।।आप्यायमानोबहुधाजनेषु।।रेतःप्रजां
यजमानेदधातु।।यत्तेनक्षत्रंमृगशीर्षमस्ति।।प्रियंराजन्प्रियतमं

उ०शां० त्रियाणां ॥ तस्मै ते सोम हविषा विधेम ॥ शंन ऽ एधि द्विपदे शं चतुष्पदे
३१ रतां ॥ आर्द्रया रुद्रः प्रथमान ऽ एति ॥ श्रेष्ठो देवानां पतिरघ्नियानां ॥ नक्ष
त्रमस्य हविषा विधेम ॥ मा नः प्रजाꣳ रीरिषन्मोत वीरान् ॥ हेती रुद्र
स्य परिणो वृणक्तु ॥ आर्द्रा नक्षत्रꣳ जुषताꣳ हविर्नः ॥ प्रमुंचमानो
दुरितानि विश्वा ॥ अपाघशꣳसन्नुदतामरातिं ॥ पुनर्नो देव्य
दितिस्पृणोतु ॥ पुनर्वसू नः पुनरेतां यज्ञं ॥ पुनर्नो देवा अभियंतु सर्वे ॥ पुनः पुनर्वो हविषा यजामः ॥ एवा न देव्यदितिरनर्वा ॥ ३१

विश्वस्य भर्त्री जगतः प्रतिष्ठा ॥ पुनर्वसू हविषा वर्धयंती ॥ प्रियं देवा
नामप्येतु पाथः ॥ बृहस्पतिः प्रथमं जायमानः ॥ तिष्यं नक्षत्रमभि
संबभूव ॥ श्रेष्ठो देवानां पृतनासु जिष्णुः ॥ दिशो नु सर्वा अभयन्नो
अस्तु ॥ तिष्यः पुरस्तादुत मध्यतो नः ॥ बृहस्पतिर्नः परिपातु पश्चा
त् ॥ बाधेतां द्वेषो अभयं कृणुतां ॥ सुवीर्यस्य पतयः स्याम ॥ इदं
सर्पेभ्यो हविरस्तु जुष्टं ॥ आश्रेषा येषामनुयंति चेतः ॥ ये अंतरिक्षं पृ
थिवीं क्षियंति ॥ ते नः सर्पासो हवमागमिष्ठाः ॥ ये रोचने सूर्यस्या

उ॰शां॰ पि सर्पाः॥ये दिवं देवी मनु संचरंति॥ येषामाश्रेषा अनुयंति कामं॥
३२ तेभ्यः सर्पेभ्यो मधुमज्जुहोमि॥ उपहूता पितरो ये मघास्के॥ मनो
जवसः सुकृतः सुकृत्याः॥ ते नो नक्षत्रे हवमागमिष्ठाः॥ स्वधाभि
र्यज्ञं प्रयतं जुषंतां॥ ये अग्निदग्धा ये नग्निदग्धाः॥ ये मुं लोकं पित
रः क्षियंति॥ यां श्च विद्म यां उ च न प्रविद्म॥ मघास्के यज्ञं सुकृ
तं जुषंतां॥ गवां पतिः फल्गुनी नामसि त्वं॥ तदर्यमन्वरुण ७ ७ ७
मित्र चारु॥ तं त्वा वयं सनितारं सनीनां॥ जीवाजीवंतमुप ३२

ने संविशेम॥ यैं माविश्वाभुवनानिसंजिता॥ यस्यदेवाअनुसंयंति
चेतः॥ अर्यमाराजाजरस्तुविष्मान्॥ फल्गुनीनामृषभोरोरवीति॥
श्रेष्ठोदेवानांभगवोभगासि॥ तत्त्वाविदुः फल्गुनीस्तस्यवित्ता
त्॥ अस्मभ्यंक्षत्रमजरं सुवीर्यं॥ गोमदश्ववदुपसंनुदेह॥ भ
गोहदाताभगइत्प्रदाता॥ भगोदेवीः फल्गुनीराविवेश॥ भग
स्येत्तं प्रसवंगमेम॥ यत्रदेवैः सधमादंमदेम॥ आयातुदेवः सविता
पयातु॥ हिरण्ययेनसुवृतारथेन॥ वहन्हस्तं सुभगंविद्मनापसं॥

उ॰ ब्रा॰ प्रयच्छंतं पपुरिं पुण्यमच्छ ॥ हस्तः प्रयच्छ त्वमृतं वसीयः ॥ दक्षिणेन
३२ प्रतिगृभ्णीम एनत् ॥ दातारमद्य सविता विदेय ॥ यो नो हस्ता
य प्रसुवाति यज्ञं ॥११॥ त्वष्टा नक्षत्रमभ्येति चित्रां ॥ सुभं संसं
युवतिं रोचमानां ॥ निवेशयन्नमृतान्मर्त्यांश्च ॥ रूपाणि पिं
शन्भुवनानि विश्वा ॥ तन्नस्त्वष्टा तदु चित्रा विचष्टां ॥ तन्नक्षत्रं भूरि
दा अस्तु मह्यं ॥ तन्नः प्रजां वीरवतीं सनोतु ॥ गोभिर्नो अश्वैः सम
नक्तु यज्ञं ॥१२॥ वायुर्नक्षत्रमभ्येति निष्ट्यां ॥ तिग्मशृंगो वृ ३३

षभोरोरुवाणः॥ समीरयन्भुवना मातरिश्वा॥ अपद्वेषां नुदताम सि
रातीः॥ तन्नो वायुस्तदु निष्ट्या शृणोतु॥ तन्नक्षत्रं भूरिदा अस्तु
मह्यं॥ तन्नो देवासो अनुजानन्तु कामं॥ यथा तरेम दुरितानि वि
श्वा॥ दूरमस्मच्छत्रवो यन्तु भीताः॥ तदिन्द्राग्नी कृणुतां तद्विशा
खे॥ तन्नो देवा अनुमदन्तु यज्ञं॥ पश्चात्पुरस्तादभयन्नो अस्तु
॥ नक्षत्राणामधिपत्नी विशाखे॥ श्रेष्ठाविन्द्राग्नी भुवनस्य
गोपौ॥ विषूचः शत्रूनपबाधमानौ॥ अपक्षुधन्नुदतामरा

उ॰ब्रां ॥ ३४ ॥

तिं ॥ पूर्णा प श्चादुत पूर्णा पुरस्तात् ॥ उन्मध्यतः पौर्णमासी जिगा
य ॥ तस्यां देवा अधिसंवसंतः ॥ उत्तमे नाक इह मादयंतां ॥ पृथ्वी
स्रुवर्चा युवतिः सजोषाः ॥ पौर्णमास्युदगाच्छोभमाना ॥ आ
प्यायंती दुरितानि विश्वा ॥ उरुं दुहां यजमानाय यज्ञं ॥ ऋध्या
स्म हव्यैर्नमसोपसद्य ॥ मित्रं देवं मित्रधेयं नो अस्तु ॥ अनूरा
धान्हविषा वर्धयंतः ॥ शतं जीवेम शरदः सवीराः ॥ चित्रं नक्षत्रम्
मुदगात्पुरस्तात् ॥ अनूराधास इति यद्वदंति ॥ तन्मित्र एति प ३४

थिभिर्देवयानैः॥ हिरण्ययैर्वितते रंतरिक्षे॥ इंद्रो ज्येष्ठामनु नक्ष
त्रमेति॥ यस्मिन्वृत्रं वृत्रतूर्ये ततार॥ तस्मिन्वयममृतं दुहानाः॥ क्षु
धंतरेम दुरितिं दुरिष्टिं॥ पुरंदराय वृषभाय धृष्णवे॥ अषाढाय
सहमानाय मीढुषे॥ इंद्राय ज्येष्ठा मधुमद्दुहाना॥ उरुं कृणोतु य
जमानाय लोकं॥ मूलं प्रजां वीरवतीं विदेय॥ पराच्येतु निर्ऋ
तिः पराचा॥ गोभिर्नक्षत्रं पशुभिः समक्तं॥ अहर्भूयाद्यजमा
नाय मह्यं॥ अहर्नो अद्य सुविते दधातु॥ मूलं नक्षत्रमितिय

उ·शं·द्द्दंति॥ परोचीं वाचा निर्ऋतिं नुदामि॥ शिवं प्रजायै शिवमस्तु
३५॥ मह्यं॥ या दिव्या आपः पयसा संबभूवुः॥ या अंतरिक्ष उत पार्थिवी
र्यीः॥ यासाम षाढा अनुयंति कामं॥ तान आपः शं स्योना भ
वंतु॥ याश्च कूप्या याश्च नाद्यीः समुद्रियाः॥ याश्च वैशंतीरुत
प्रासचीर्याः॥ यासाम षाढा मधु भक्षयंति॥ तान आपः
शं स्योना भवंतु॥ तन्नो विश्वे उप शृण्वंतु देवाः॥ तद षाढा अ राम
भि संयंतु यज्ञं॥ तन्नक्षत्रं प्रथतां पशुभ्यः॥ कृषिर्वृष्टिर्यजं॥ ३५॥

मानायकल्पतां ॥ शुम्भाः कन्यायुवतयः स्वपेशसः ॥ कर्मकृतः सुकृतो वीर्यावतीः ॥ विश्वान्देवान्हविषा वर्धयंती ॥ अषाढां कामम्मुपयांतु यज्ञं ॥ यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत् ॥ अमुं च लोकमिदमूचसर्वं ॥ तन्नो नक्षत्रमभिजिद्विजित्य ॥ श्रियं दधात्वहृणीयमानं ॥ उभौ लोकौ ब्रह्मणा संजितेमौ ॥ तन्नो नक्षत्रमभिजिद्विचष्टां ॥ श्रियं दधात्वहृणीयमानं ॥ तस्मिन्वयं पृतनाः संजयेम ॥ तन्नो देवासो अनुजानंतु कामं ॥ शृण्वंति श्रोणाममृतस्य

उ॰ श्रां॰ गोपां ॥ पुण्यामस्या उपशृणोमि वाचं ॥ महीं देवीं विष्णुपत्नीमजूर्यां ॥ प्रतीचीमेनाꣳहविषा यजामः ॥ त्रेधा विष्णुरुरुगायो विचक्रमे ॥ महीं दिवं पृथिवीमंतरिक्षं ॥ तच्छ्रोणैति श्रवइच्छमाना ॥ पुण्यꣳश्लोकं यजमानाय कृण्वती ॥ अष्टौ देवा वसवः सोम्यासः ॥ चतस्रो देवीरजराः श्रविष्ठा ॥ ते यज्ञं पांतु रजसः पुरस्तात् ॥ संवत्सरीणममृतꣳस्वस्ति ॥ यज्ञं नः पांतु वसवः पुरस्तात् ॥ दक्षिणतो भियंतु श्रविष्ठाः ॥ पुण्यं नक्षत्रमभिसंविशाम ॥ मा

उ॰ धं॰ राम उ॰ धं॰

नो अरातिरघशꣳसा गन्॥ क्षत्रस्य राजा वरुणोधिराजः॥ नक्षत्राणाꣳ
शतभिषग्वसिष्ठः॥ तौ देवेभ्यः कृणुतो दीर्घमायुः॥ शतꣳ सहस्राभेष
२ण जानि धत्तः॥ यज्ञन्नो राजा वरुण उपयातु॥ तन्नो विश्वे अभिसंयंतु दे
वाः॥ तन्नो नक्षत्रꣳ शतभिषग्जुषाणं॥ दीर्घमायुः प्रतिरद्भेषजानि॥
अज एकपादुदगात्पुरस्तात्॥ विश्वा भूतानि प्रतिमोदमानः॥ तस्य
देवाः प्रसवं यंति सर्वे॥ प्रोष्ठपदासो अमृतस्य गोपाः॥ विभ्राजमानः
समिधान उग्रः॥ आंतरिक्षमरुहदगंद्यां॥ तꣳ सूर्यं देवमजमेक

सो

उ॰ग्रं॰ पादं॥ श्रोष्ठपदा अनुयंतिसर्वे॥ अहिर्बुध्निय प्रथमानऽति॥ श्रेष्ठो

२७॥ देवानामुतमानुषाणां॥ तंब्राह्मणाःसोमपाःसोम्यासः॥ श्रोष्ठपदा

सो अभिरक्षंतिसर्वे॥ चत्वारऽएकमभिकर्मदेवाः॥ श्रोष्ठपदासइ

तियान्वदंति॥ तेबुध्नियंपरिषद्यꣳस्तुवंतः॥ अहीꣳरक्षंतिनमसो

पसद्य॥ पूषारेवत्यन्वेतिपंथां॥ पुष्टि पतीपशुपावाजबस्त्यौ राम्

॥इमानिहव्याप्रयताजुषाणा॥ सुगैर्नोयानैरुपयातांयज्ञं॥ क्षु २७॥

द्रान्पशून्रक्षतुरेवतीनः॥ गावोनोअश्वाꣳअन्वेतुपूषा॥ अन्नꣳ

रक्षंनोबहुधाविरूपं।।वाजंसनुतांयजमानाययज्ञं।।तदश्विनाव
श्वयुजोपयातां।।शुभंगमिष्ठौसुयमेभिरश्वैः।।स्वंनक्षत्रंहविषाय
जंतौ।।मध्वासंपृक्तौयजुषासमक्तौ।।यौदेवानांभिषजौहव्यवाहौ।।
विश्वस्यदूतावमृतस्यगोपौ।।तौनक्षत्रंजुजुषाणोपयातां।।नमोऽश्वि
भ्यांकृणुमो [illegible] श्वयुग्भ्यां।।अपपा [illegible] प्मानंभरणीर्भरंतु।।तद्य
मोराजाभगवान्विचष्टां।।लोकस्यराजामहतोमहान्हि।।सुगंनःपं
थामभयंकृणोतु।।यस्मिंनक्षत्रेयमएतिराजा।।यस्मिन्नेनमभ्य

उ॰शां॰ षिंचंतदेवाः॥तदस्यचित्रंहविषायजाम॥अपपाप्मानंभरणीर्भ
३८ ॥ रंतु॥निवेशनीसंगमनीवसूनांविश्वारूपाणिवसून्यावेशयं
ती॥सहस्रपोषंसुभगारराणासानआगन्वर्चसासंविदाना
॥यत्तेदेवाअदधुर्भागधेयममावास्येसंवसंतोमहित्वा॥सा
नोयज्ञंपिपृहिविश्ववारेरयिंनोधेहिसुभगेसुवीरं॥नवोन
वोभवतिजायमानोह्नांकेतुरुषसामेत्यग्रे॥भागंदेवेभ्योविद ॥ राम ॥
धात्यायन्प्रचंद्रमास्तिरतिदीर्घमायुः॥यमादित्याअंशुमा ॥ २८ ॥

भुवन

प्यायर्यं त्रियमक्षितिमक्षितयः पिबंति ॥ तेन नो राजा वरुणो बृह
स्पतिराप्यायर्यंतु [stain]स्य गोपाः ॥ येविरूपे समनसा संव्ययंती ॥
समानं तंतुं परितातनाते ॥ विभूं प्रभूं अनुभूं विश्वतो हुवे ॥ ते नो न

त्रे

क्षेह वमागमेतं ॥ वयं देवी ब्रह्मणा संविदानाः ॥ स्करत्नासो देववी
तिंदधानाः ॥ अहोरात्रे हविषा वर्धयंतः ॥ अति पाप्मानमतिमुक्त्या
गमेम ॥ प्रत्युवदृश्यायती ॥ व्युच्छंती दुहिता दिवः ॥ अपो मही वृणु
ते चक्षुषा ॥ तमो ज्योतिष्कृणोति सूनरी ॥ उदुस्रियाः सचते सूर्यः ॥

उ·शां· सचा उद्यन्नक्षत्रमर्चिमत्॥ तवेदुषो व्युषि सूर्यस्य च॥ संभक्तेन ग
३९॥ मेमहि॥ तन्नो नक्षत्रमर्चिमत्॥ भानुमत्तेज उच्चरत्॥ उप यज्ञमि
त्र ३ हागमत्॥ प्र नक्षत्राय देवाय॥ इंद्रायेंदुं हवामहे॥ स नः सविता स
वत्सनिं॥ पुष्टिदां वीरवत्तमं॥ उदु त्यं जातवेदसं देवं वहंति केतवः
॥ दृशे विश्वाय सूर्यं॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य
वरुणस्याग्नेः॥ आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा ॥राम॥
जगतस्तस्थुषश्च॥ अदितिर्न उरुष्यत्वदितिः शर्म यच्छतु॥ ३९॥

अदितिः पात्वꣳहसः ॥ महीमूषु मातरꣳ सुव्रतानामृतस्य पत्नीमव
सेहुमेवे ॥ तुविक्षत्रामजरंतीमुरूचीꣳ सुशर्माणमदितिꣳ सुप्र
णीतिं ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पाꣳसुरे ॥
प्रतद्विष्णुस्तवते वीर्याय ॥ मृगो न भीमः कुचरो गिरिष्ठाः ॥ यस्यो
रुषु त्रिषु विक्रमणेषु ॥ अधिक्षियंति भुवनानि विश्वा ॥ अग्नि
र्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं ॥ अपाꣳ रेताꣳसि जिन्वति ॥
भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ॥ दिवि

उ॰ ज्ञा॰ मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहं ॥ अनु नो द्यानुम
४ तिर्यज्ञं देवेषु मन्यतां ॥ अग्निश्च हव्यवाहनो भवतां दाशुषे मयः
अन्विदनुमते त्वं मन्यासै शं च नः कृधि ॥ क्रत्वे दक्षाय नो हिनु प्र
ण आयूंषि तारिषः ॥ हव्यवाहमभिमातिषाहं ॥ रक्षोहणं पृत
नासु जिष्णुं ॥ ज्योतिष्मंतं दीद्यतं पुरंधिं ॥ अग्निं स्विष्टकृतमा
हुवेम ॥ स्विष्टमग्ने अभितत्पृणाहि ॥ विश्वा देव पृतना अभिष्य रामू
॥ उरुं नः पंथां प्रदिशन्विभाहि ॥ ज्योतिष्मद्धेह्यजरं न आयुः ॥ ४

अग्नयेस्वाहा कृत्तिकाभ्यः स्वाहा॥ अंबायैस्वाहा दुलायैस्वाहा॥ नितत्न्यैस्वा
हा भ्रयंत्यैस्वाहा॥ मेघयंत्यैस्वाहा वर्षयंत्यैस्वाहा॥ चुपुणीकायैस्वाहा॥ १॥
प्रजापतयेस्वाहा रोहिण्यै स्वाहा॥ रोचमानायैस्वाहा प्रजाभ्यः स्वाहा॥ सोमाय
४ स्वा स्वाहा मृगशीर्षाय स्वाहा॥ इन्वकाभ्यः होषधीभ्यः स्वाहा॥ राज्याय स्वाहा भि
जित्यै स्वाहा॥ २॥ रुद्राय स्वाहा द्रीयै स्वाहा॥ पिन्वमानायै पशुभ्यः स्वाहा॥ ४ स्वाहा ५
यु ३ अदित्यै स्वाहा पुनर्वसूभ्यां स्वाहा॥ स्वाहा भूत्यै स्वाहा प्रजात्यै स्वाहा॥ ५॥ ब
४ मा हस्पतये स्वाहा तिष्याहाँ स्वो ब्रह्मवर्चसाय स्वाहा॥ सर्पेभ्यः स्वाहा श्रेषा
भ्यः स्वाहा॥ दंदशूकेभ्यः स्वाहा॥ ७॥ पितृभ्यः स्वाहा मघाभ्यः॥ स्वाहा नघा
भ्यः स्वाहा गदाभ्यः॥ स्वाहा रुंधतीभ्यः स्वाहा॥ अर्यम्णे स्वाहा फल्गुनीभ्याः

४१२३५६७८९

॥कामचाराय स्वाहा भिजित्यै स्वाहा॥ ४

उ०रा० स्वाहा॥ पशुभ्यः स्वाहा॥ भगाय स्वाहा फल्गुनीभ्यां स्वाहा॥ श्रैष्ठ्याय स्वाहा॥ स
८२ वित्रे स्वाहा हस्ताय॥ स्वाहा ददते स्वाहा पृणते॥ स्वाहा प्रयच्छते स्वाहा प्रतिगृभ्ण
ते स्वाहा॥ ११॥ त्वष्ट्रे स्वाहा चित्रायै स्वाहा॥ चैत्राय स्वाहा प्रजायै स्वाहा॥ १२॥
वायवे स्वाहा निष्ठ्यायै स्वाहा॥ १३॥ इंद्राग्निभ्यां स्वाहा विशाखाभ्यां स्वाहा
॥ श्रैष्ठ्याय स्वाहा भिजित्यै स्वाहा॥ १४॥ पौर्णमास्यै स्वाहा कामाय स्वाहा गत्यै
स्वाहा॥ १५॥ मित्राय स्वाहा नूराधेभ्यः स्वाहा॥ मित्रधेयाय स्वाहा भिजित्यै स्वा
हा॥ १६॥ इंद्राय स्वाहा ज्येष्ठायै स्वाहा॥ ज्यैष्ठ्याय स्वाहा भिजित्यै स्वाहा॥ १७
॥ प्रजापतये स्वाहा मूलाय स्वाहा॥ प्रजायै स्वाहा॥ १८॥ अद्भ्यः स्वाहा पाठा रामू
भ्यः स्वाहा॥ समुद्राय स्वाहा कामाय स्वाहा॥ अभिजित्यै स्वाहा॥ १९॥ विश्वे ८२

भ्यो देवेभ्यः स्वाहा षाढाभ्यः स्वाहा ॥ अनपजय्याय स्वाहा जित्यै स्वाहा ॥ २ ॥ ब्रह्मणे
स्वाहाभिजिते स्वाहा ॥ ब्रह्मलोकाय स्वाहाभिजित्यै स्वाहा ॥ विष्णवे स्वाहा श्रोणायै स्वा
हा ॥ श्लोकाय स्वाहा श्रुताय स्वाहा ॥ २२ ॥ वसुभ्यः स्वाहा श्रविष्ठाभ्यः स्वाहा ॥ अग्रा
य स्वाहा परीत्यै स्वाहा ॥ २२ ॥ वरुणाय स्वाहा शतभिषजे स्वाहा ॥ भेषजेभ्यः स्वाहा ॥ २३
अजायैकपदे स्वाहा प्रोष्ठपदेभ्यः स्वाहा ॥ तेजसे स्वाहा ब्रह्मवर्चसाय स्वाहा ॥ २४ ॥
अहये बुध्नियाय स्वाहा प्रोष्ठपदेभ्यः स्वाहा ॥ प्रतिष्ठायै स्वाहा ॥ २५ ॥ पूष्णे स्वाहा रे
वत्यै स्वाहा ॥ पशुभ्यः स्वाहा ॥ अश्विभ्यां स्वाहा श्वयुग्भ्यां स्वाहा ॥ श्रोत्राय स्वाहा
श्रुत्यै स्वाहा ॥ यमाय स्वाहापभरणीभ्यः स्वाहा ॥ राज्याय स्वाहाभिजित्यै स्वाहा ॥ २८
अमावास्यायै स्वाहा कामाय स्वाहागत्यै स्वाहा ॥ चंद्रमसे स्वाहा प्रतीदस्यायै स्वा

उ॰ श्रां॰ हा॥ अहोरात्रेभ्यः स्वाहा॥ अर्धमासेभ्यः स्वाहा॥ मासेभ्यः स्वाहा॥ ऋतुभ्यः स्वाहा॥ संवत्स

४२ राय स्वाहा॥ अह्ने स्वाहा॥ रात्रियै स्वाहा॥ अतिमुक्त्यै स्वाहा॥ ३१॥ उषसे स्वाहा॥ व्यु

ष्ट्यै स्वाहा॥ व्युषुष्यै स्वाहा॥ व्युच्छत्यै स्वाहा॥ व्युष्टायै स्वाहा॥ ३२॥ नक्षत्राय

स्वाहा॥ दिव्यते स्वाहा॥ उद्यते स्वाहा॥ उदिताय स्वाहा॥ हरसे स्वाहा॥ भरसे स्वाहा॥

॥ भ्राजसे स्वाहा॥ तेजसे स्वाहा॥ तपसे स्वाहा॥ ब्रह्मवर्चसे स्वाहा॥ सूर्याय स्वाहा॥ न

क्षत्रेभ्यः स्वाहा॥ प्रतिष्ठायै स्वाहा॥ ३४॥ आदित्यै स्वाहा॥ प्रतिष्ठायै स्वाहा॥ ३५॥

स्पा॰ विष्णवे यज्ञाय स्वाहा॥ अतितये स्वाहा॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य

वाजिनः॥ सुरभि नो मुखा करत्प्रण आयूंषि तारिषत्॥ आपो हि ष्ठा मयोभु राम

वः॰ ऋ॰ कू॰ ३॥ यच्चिद्धि ते विशो यथा॰ ऋ॰ कू॰ १॥ यत्किंचेदं वरुण दैव्ये जनेभि ४२

श्री ३

य मा: पृथिविं पयसोंदं

द्रोहं मनुष्याश्चरामसि॥ अचित्ती यत्तव धर्मायुयोपिममानस्तस्मादेनसो देव
रीरिषः॥ कितवासो यद्रिरिपुर्नदीवि यद्वा घासत्यमुतयन्न विद्म॥ सर्वाता विष्यशि
थिरेव देवाथाते स्याम वरुण प्रियासः॥ हिरण्यवर्णाः शुचयः पावका यासु जा
तः कश्यपो यास्विंद्रः॥ अग्निं या गर्भं दधिरे विरूपास्तान आपः शꣳ स्योना भ
वंतु॥ यासाꣳ राजा वरुणो याति मध्ये सत्यानृते अवपश्यंजनानां॥ मधुश्चु
शुचं भवंतु॥ यासां देवा दिवि कृण्वंति भक्षं या अंतरिक्षे बहुधा भवंति॥ मधु
श्चुतं भवंतु॥ शिवेन मा चक्षुषा पश्यतापः शिवया तनुवोप स्पृशत त्वचं मे
॥ सर्वाꣳ अग्नीꣳ रप्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त॥ पवमानः
सुवर्जनः॥ पवित्रेण विचर्षणिः॥ यः पोता स पुनातु मा॥ पुनंतु मा देवजनाः॥

पु॰शां पुनंतु मनवो धिया॥ पुनंतु विश्व आयवः॥ जातवेदः पवित्रवत्॥ पवित्रेण पु
४७ नाहि मा॥ शुक्रेण देव दीद्यत्॥ अग्ने क्रत्वा क्रतूँरनु॥ यत्ते पवित्रमर्चिषि॥
अग्ने विततमंतरा॥ ब्रह्म तेन पुनीमहे॥ उभाभ्यां देव सवितः॥ पवित्रेण स
वेन च॥ इदं ब्रह्म पुनीमहे॥ वैश्वदेवी पुनंती देव्यागात्॥ यस्यै बह्वीस्त
न्वो वीतपृष्ठाः॥ तया मदंतः सधमाद्येषु॥ वयं स्याम पतयो रयीणां॥
वैश्वानरो रश्मिभिर्मा पुनातु॥ वातः प्राणेनेषिरो मयोभूः॥ द्यावापृथिवी
पयसा पयोभिः॥ ऋतावरी यज्ञिये मा पुनीतां॥ बृहद्भिः सवितस्तृभिः॥
वर्षिष्ठैर्देव मन्मभिः॥ अग्ने दक्षैः पुनाहि मा॥ येन देवा अपुनत॥ येनापो दि राम
व्यं कशः॥ तेन दिव्येन ब्रह्मणा॥ इदं ब्रह्म पुनीमहे॥ यः पावमानीरध्ये ४७

ति॥ ऋषिभिः संभृतं रसं॥ सर्वं स पूतमश्नाति॥ स्वदितं मातरिश्वना॥ पावमा
मानीर्यो अध्येति॥ ऋषिभिः संभृतं रसं॥ तस्मै सरस्वती दुहे॥ क्षीरं सर्पि
मधूदकं॥ पावमानीः स्वस्त्ययनीः॥ सुदुघाहि पयस्वतीः॥ ऋषिभिः संभृतो र
सः॥ ब्राह्मणेष्वमृतं हितं॥ पावमानीर्दिशंतु नः॥ इमं लोकमथो अमुं॥ का
मान्त्समर्धयंतु नः॥ देवीर्देवैः समाभृताः॥ पावमानीः स्वस्त्ययनीः॥ सुदु
घाहि घृतश्चुतः॥ ऋषिभिः संभृतो रसः॥ ब्राह्मणेष्वमृतं हितं॥ येन देवाः प
वित्रेण॥ आत्मानं पुनते सदा॥ तेन सहस्रधारेण॥ पावमान्यः पुनंतु मां॥ प्रा
जापत्यं पवित्रं॥ शतोद्यामं हिरण्मयं॥ तेन ब्रह्मविदो वयं॥ पूतं ब्रह्म पु

५-शां नीमहे॥ इंद्रः सुनीतीसहमापुनातु॥ सोमः स्वस्त्यावरुणः समीच्या॥ यमोराजा
८३ प्रमृणाभिः पुनातुमा॥ जातवेदामोर्जयंत्यापुनातु॥ भूर्भुवःस्वः॥ तछंयो
रावृणीमहे॥ गातुंयज्ञाय॥ गातुंयज्ञपतये॥ दैवीस्वस्तिरस्तुनः॥ स्वस्ति
र्मानुषेभ्यः॥ ऊर्ध्वंजिगातुभेषजं॥ शंनोअस्तुद्विपदे॥ शंचतुष्पदे॥ न
मोब्रह्मणेनमोअस्त्वग्नये॥ नमःपृथिव्यैनमओषधीभ्यः॥ नमोवाचे
नमोवाचस्पतये॥ नमोविष्णवेबृहतेकरोमि॥ एवंत्रिः॥ शांतिःशांतिःशां
शांतिः॥ इत्युक्षाप्य॥ भूर्भुवःस्वः इतिसंस्कार्यंप्रोक्षति॥ अथयजमानऋ
त्विग्भ्यः॥ मागादिप्राक्षिण्येनहिरण्यंरजतंकंसंवाइतिददाति॥ एतंच ८३

र गृहीतानां भृतोपसृष्टानां मित्रबंधुसुहृत् । ज्ञातिसंबंधिबांधवानां राज्ञावरा
जपुरोहितानां च आवत्स गर्भिणीपापरोगीदीर्घरोगी कृशातुराणां हस्त्यश्वोष्ट्र
गोहिष्यजाविकभृत्यानां धनधान्यां च प्रोक्षणं ॥ एवं रात्रं त्रिरात्रं वा पंचरा
त्रं सप्तरात्रं नवरात्रिं वोदकशांतिं कुर्यात् ॥ अपमृत्युपरिहारार्थमपि कुर्या
त् ॥ इत्युदकशांतिः समाप्तः ॥ श्रीगजाननार्पणमस्तु ॥ शुभं भवतु शिवि[र्घं] ॥
शके १७५७ पराभवनामसंवत्सरे वैशाख शुद्ध द्वितीया सौम्यवासरे कृ
त्तिकादिसैवे नक्षत्रे वृषभस्थिते वर्तमाने चंद्रे वृषभस्थिते देवगुरौ
भाव्ये इत्युपनामक वासुदेवात्मज परशुरामेण लिखितं ॥ स्वार्थं परार्थं च ॥

॥ उदकशांतसमाप्तोयम् ॥

[OrderDescription]
,CREATED=06.02.20 11:57
,TRANSFERRED=2020/02/06 at 12:06:00
,PAGES=91
,TYPE=STD
,NAME=S0002748
,Book Name=M-2505-UDAK SHANTI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF

FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,